Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

# श्रीस्वामिनारायणीयप्रस्थानत्रयीपरिचयः

**स्वामी स्वरूपदासजी**

अनुसंधान विद्वान

संस्कृत विभाग

वीर नर्मद दक्षिण गुजरात विश्वविद्यालय

**Vidhyayana - ISSN 2454-8596**
An International Multidisciplinary Peer-Reviewed E-Journal
www.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

**प्रस्थानत्रयी** – सिद्धान्ताः प्रस्थीयन्तेऽनेनेति प्रस्थानम् । त्रयोऽवयवा अस्य सन्तीति त्रयी । प्रस्थानस्य त्रयीति प्रस्थानत्रयी । (ष.त.)

वैदिकसिद्धान्तान् स्थापयितुमवयवत्रयं (ग्रन्थत्रयं) सुप्रसिद्धमस्ति सनातनवैदिकपरम्परायाम् । **"दशोपनिषद्, श्रीमद्भगवद्गीता, ब्रह्मसूत्रम्"** इति ग्रन्थत्रयाणां समावेशो भवति प्रस्थानत्रय्याम् । सर्वे वेदान्तिनः प्रस्थानत्रयीमुररीकृत्य स्वसम्प्रदायसिद्धान्तान् प्रस्थापयन्ति । "प्रस्थानं नाम विजिगीषोः प्रयाणम् (अम.)" इत्यमरकोशोक्त्यनुसारेण स्वसिद्धान्तान् जेतुं प्रस्थापयितुं ग्रन्थत्रयस्योपरि स्वभाष्यं व्यरचयन् पूर्वाचार्याः । तद्यथा –

### (१) अद्वैतदर्शनम्

**"भगवत्पादशङ्कराचार्यः"** प्रस्थापकोऽस्ति अद्वैतदर्शनस्य । ई. ७८८ तः ८२० यावत्कालोऽस्ति प्रायशश्शङ्कराचार्यस्य । स्वेनैव प्रस्थानत्रयीभाष्यं व्यरचि । समग्रभारतवर्षं भ्रमित्वा बौद्धदर्शनं दूरीकृत्य स्वपीठानि प्रस्थापयामास ।

"ब्रह्म सत्यं जगन्मिथ्या" इति प्रबलपरिभाषाऽस्य दर्शनस्य । "नित्यमुक्तशुद्धबुद्धसत्यस्वभावं प्रत्यक्चैतन्यमेव आत्मा" इति ब्रह्मविषयिणी मतिस्तेषाम् । "अयमात्मा ब्रह्म" इत्याद्यद्वैतश्रुतिभिः ब्रह्मैकमेव सत्यं निर्गुणं च । तदन्यत् ज्ञातृज्ञेयादिकं सकलं जगत् तस्मिन्नेव परिकल्पितत्वात् स्वप्नवन्मिथ्याभूतम् ज्ञेयम् । "पारमार्थिकसत्ता, व्यावहारिकसत्ता, प्रातिभासिकसत्ता" इति सत्तात्रयमङ्गीकुर्वन्ति अद्वैतिनः । मायाया अनिर्वचनीयत्वं प्रतिपादयन्तीमे ।

### (२) विशिष्टाद्वैतदर्शनम्

दर्शनस्याऽस्य संस्थापकोऽस्ति **"भगवत्पादरामानुजाचार्यः"** । १०१७ खिष्टाब्दे तमिलनाडुराज्ये श्रीपेरुम्बुदूरग्रामे जन्म अभवत् रामानुजाचार्यस्य । "श्रीमद्भगवद्गीता, ब्रह्मसूत्रम्" इति ग्रन्थद्वयानां भाष्यं व्यरचि स्वेन । दशानामुपनिषदां भाष्यं

तदनुगामी तत्परमशिष्यो रङ्गरामानुजो व्यरचयत्।

सत्ख्यातिवादिन इमे रामानुजीयाः । **"चिद्, अचिद्, ब्रह्म"** इति तत्त्वत्रयं सत्यत्वेन विशिष्टवेषेणाऽङ्गीकुर्वन्ति । "सूक्ष्मचिदचिद्विशिष्टं ब्रह्म एव स्थूलचिदचिद्विशिष्टरूपेण परिणमते" इति परिणामवादिनो विशिष्टाद्वैतवादिनः, न तु आरम्भणवादिनः। भक्तिप्रपत्त्योः प्राधान्येन प्रतिपादयन्तीमे वेदान्तिनः।

**(३) द्वैतदर्शनम्**

**श्रीमध्वाचार्यः"** प्रस्थापकोऽस्ति द्वैतदर्शनस्य । ई. १२३८ तः १३१७ यावत्कालोऽस्ति आचार्यस्य । दक्षिणभारतेऽभवज्जन्म श्रीमध्वाचार्यस्य। दशानामुपनिषदां ब्रह्मसूत्राणां भाष्यं व्यरचि स्वेनैव। स्वसम्प्रदायस्य पुष्ट्यर्थं कर्णाटकराज्ये उडुपीनगरे स्वपीठं प्रस्थापयामास।

**"स्वतन्त्रः, परतन्त्रः"** इति तत्त्वद्वयमङ्गीकृतत्वात् द्वैतवादिन इमे। तत्र तावत्परमात्मा स्वतन्त्रः, जीवः परतन्त्रः । अथवा "द्वैतशब्दो भेदार्थवाची" इत्यङ्गीकुर्वन्तीमे। **"जीवेश्वरभेदः, जडेश्वरभेदः, जडजीवभेदः, मिथो जीवभेदः, मिथो जडभेदः"** इति पञ्चानादिभेदाः तन्मते।

**(४) द्वैताद्वैतदर्शनम्**

"भेदाभेदः" इत्यपराख्यया प्रसिद्धस्य दर्शनस्याऽस्य संस्थापकोऽस्ति **"श्रीनिम्बार्काचार्यः"** इति। चतुर्दशी शताब्दी जीवनकालोऽस्ति निम्बार्काचार्यस्य। ब्रह्मसूत्राणामुपरि "वेदान्तपारिजातसौरभम्" इति भाष्यं व्यरचि।

**"चिद्, अचिद्, ब्रह्म"** इति तत्त्वत्रयं स्वीकुर्वन्तीमे । चिदचिदोः ब्रह्मणो भिन्नत्वात् भेदः तथापि विना ब्रह्मणा स्वातन्त्र्येन चिदचिदोः सत्ताऽशक्या इति धिया अभेदोऽपि । श्रीकृष्णः परमाराध्येष्टदेवो, राधिका प्रधानभक्ताऽस्ति । भक्तेः प्रबलसाधनत्वमङ्गीकुर्वन्ति मोक्षाय ।

**(५) शुद्धाद्वैतदर्शनम्**

अस्य दर्शनस्य प्रस्थापकोऽस्ति **"श्रीवल्लभाचार्यः"** इति । ई. १४७९ तः १५३१ यावत् समयावधिरस्ति आचार्यस्य । ब्रह्मसूत्राणामुपरि "अणुभाष्यम्" विरचितवान् । समग्रभारतवर्षे ८४ पीठानि सन्ति सम्प्रदायस्याऽस्य ।

दर्शनेऽस्मिन् एकमेवाद्वितीयं ब्रह्मतत्त्वमङ्गीकृतमस्ति । स्वेच्छया तदेव ब्रह्म जीवजगद्रूपेण परिणमते । परिणामस्तु भगवल्लीला । जीवजगद्रूपेण परिणमत्सदपि स्वयं निर्विकारित्वात् शुद्धतत्त्वमेव । अद्वैतब्रह्मणश्शुद्धत्वात् "शुद्धाद्वैतदर्शनम्" इत्याख्यया सुप्रसिद्धमिदं दर्शनम् । सेवायां कथायाञ्च दृढासक्तिरेव मुख्यसाधनम् ।

**(६) अचिन्त्यभेदाभेददर्शनम्**

**"चैतन्यमहाप्रभुः"** प्रणेताऽस्ति अस्य दर्शनस्य । १४८६ खिष्टाब्दे पश्चिमबङ्गाले जन्म अभूताचार्यस्य । तत्परम्परायां १८७५ खिष्टाब्दे बलदेवविद्याभूषणैः "गोविन्दभाष्यम्" इत्याख्यब्रह्मसूत्रभाष्यं व्यरचि । "गौडीय-सम्प्रदायः" इत्यभिख्यया सुप्रथितोऽस्ति सम्प्रदायोऽयम् ।

परमात्मा स्वयं शक्तिमानस्ति । स्वस्य अनन्ताः शक्तयस्सन्ति । **"शक्तिशक्तिमतोः भेदोऽभेदो वाऽस्ति"** इति चिन्तयितुमनर्हत्वात् अचिन्त्यभेदाभेदः । परमाराध्यदेवः श्रीकृष्णोऽस्ति । "भागवत-महापुराणं, श्रीमद्भगवद्गीता" इति शास्त्रद्वयं प्रधानत्वेनाऽङ्गीकुर्वन्ति ।

VIDHYAYANA

**Vidhyayana - ISSN 2454-8596**

An International Multidisciplinary Peer-Reviewed E-Journal

**www.vidhyayanaejournal.org**

**Indexed in: ROAD & Google Scholar**

**(७) स्वामिनारायणदर्शनम्**

**"स्वयं परब्रह्म पुरुषोत्तमनारायणः स्वामिनारायणभगवान्"** संस्थापकोऽस्ति दर्शनस्याऽस्य । १७८१ खिष्टाब्द अयोध्यासमीपे छपैयाख्यग्रामे जनिरभूत् परमात्मनः । स्वयं परमात्मना न रचितं प्रस्थानत्रयीभाष्यम् । परं परमात्मप्रेरणया **सद्गुरुमुक्तानन्दस्वामी** ब्रह्मसूत्राणामुपरि "ब्रह्मसूत्रभाष्यरत्नं" व्यरचयत् । **योगिवर्यश्रीगोपालानन्दमुनिना** दशानामुपनिषदां भाष्यं गीताभाष्यञ्च व्यरचि ।

**"मतं विशिष्टाद्वैतं मे (शिक्षा. १२१)"** इति भगवदुक्तसुधावचनात् सम्प्रदायस्य सिद्धान्तसरणी विशिष्टाद्वैतमतावलम्बिनी । परमस्मिन् दर्शने "चित्, अचित्, परब्रह्म" इति तत्त्वत्रयमङ्गीकृत्य "जीवः, ईश्वरः, ब्रह्म, परब्रह्म, माया" इति पञ्चभेदा निरूपिताः । क्वचित्साम्प्रदायिकार्थ इतरविलक्षणः । तत्सकलं विस्तरशो निरूप्यतऽग्रे ।

● **प्रेरणा भाष्यरचनस्य**

प्रबलप्रमाणमुद्ध्रियतेऽत्र परबलक्षपणार्थम् । श्रीस्वामिनारायणः परमात्मा दुर्गपुरमध्यप्रकरणस्य एकोनषष्टितमे वचनामृते पुरतस्स्थितान् सकलसाधून् पप्रच्छ यद् – **"सम्प्रदायपुष्टिः केन साधनेन भवति ?"** मुक्तानन्दादय उत्तरितवन्तः परं नैके समादधाना आसन् । तदानीं स्वयं श्रीजीमहाराजो होवाच यद् – "यथा रामचन्द्रोपासकस्य पुष्टिः वाल्मिकीरामायणतः । श्रीकृष्णोपासकस्य पुष्टिः श्रीमद्भागवतस्य दशमैकादशस्कन्धतः । परं न भवति पुष्टिरनयोः चतुर्वेदात् । स्वसम्प्रदायस्य पुष्टिर्भवति स्वसम्प्रदाय सिद्धान्तप्रतिपादकग्रन्थेभ्य एव ।" इत्युक्त्वा स्वामिनारायणभगवान् मुक्तानन्दस्वामिनमाज्ञापयामास – **"भवता सम्प्रदायसिद्धान्तसम्बन्धि इष्टदेवसम्बन्धि च यच्छास्त्रं, तद्देहपर्यन्तं कर्तव्यमिति मे आज्ञा । (दुर्ग.म.वच.– ५८)"** इति भगवदाज्ञां विधार्य शिरसि **मुक्तानन्दमुनिः** ब्रह्मसूत्राणामुपरि "ब्रह्मसूत्रभाष्यरत्नम्"

इत्यभूतपूर्वशास्त्रेण साकं बहुशः ग्रन्थान् व्यरचयत् ।

दुर्गपुरे(गढपुरग्रामे) नित्यानन्दमुनिः सत्सङ्गिजीवनग्रन्थं कथयामास । कथान्ते पूजयाञ्चक्रे नित्यानन्दमुनिं भगवान् श्रीहरिः कुसुमहारैः । तदनु श्रीजीमहाराज आज्ञापयामास – ‘‘यथा भवता भागवतस्य दशमपञ्चमस्कन्धयोः, विदुरनीतेः च मनोहरटीका रचिता, तथैव ‘‘**श्रीमद्भगवद्गीता,** शिक्षापत्री,निष्कामशुद्धिः’’इति ग्रन्थत्रयस्य भाष्यं रचयत्विति श्रीहरेः प्रबलेच्छाऽऽसीत् गीताभाष्यरचनस्य ।

कालानन्तरं **योगिवर्यश्रीगोपालानन्दमुनिः** गीताभाष्यं व्यरचयत् । **(श्रीस्वामिनारायणविचरणलीलामृत – उत्तरार्ध – विश्राम ९८)**

सम्प्रदायेऽस्मिन् **सद्गुरुगोपालानन्दस्वामिना** दशोपनिषद्भाष्यं व्यरचि । ‘‘सुबोधिनी’’ इति नाम्ना सुप्रसिद्धेयं टीका सम्प्रदाये । गुर्जरप्रान्त उमरेठग्रामे यत्र प्रकोष्ट उषित्वा ईशोपनिषद्भाष्यं व्यरचि, तद्दिव्यस्थानमिदानीमपि राराज्यते तत्र । भक्ताः तत्प्रसादिभूतस्थानस्य दर्शनं कृत्वाऽऽत्मनि कृत्यकृत्यतामनुभवन्ति । **(उमरेठमाहात्म्यम् – श्रीस्वामिनारायणमन्दिर उमरेठ)**

**केचनाऽऽधुनिकाः** स्वमतिविजृम्भितस्वसिद्धान्तेन अभिनवप्रस्थानत्रयीं विरचय्य स्वामिनारायण-भाष्यमिदमिति जल्पन्ति । न जानन्ति खल्वेमे साम्प्रदायिकसिद्धान्तपरम्पराम् । सम्प्रदाये पुरा गोपालानन्दस्वामिना मुक्तानन्दस्वामिना च विरचितं भाष्यमेव प्रसिद्धमधीतञ्च स्वामिनारायणाश्रितैः । साम्प्रतमपि सर्वे मुनयः तद्भाष्यमेव पठन्ति पाठयन्ति च । **‘‘श्रीसोमनाथसंस्कृतविश्वविद्यालयः – वेरावल’’** इत्यत्र परीक्षां प्रदाय उत्तीर्णा भवन्ति ।

स्वामिनारायणदर्शनस्य तत्त्वमीमांसा विशिष्टाद्वैतमतावलम्बिनी । विशिष्टाद्वैतमतमङ्गीकृतं भदवत्पादरामानुजाचार्यैः, रामानन्दाचार्यैः एवं भगवद्भिः श्रीस्वामिनारायणैः । परं तावत् क्वचन भेदस्समुपलभ्यते अस्माकं सिद्धान्ते ।

**प्रथमभेदः** – प्रायशः सकलवैष्णवदार्शनिकाः **"चिद्, अचिद्, परमेश्वरः"** इति तत्त्वत्रयमङ्गीकुर्वन्ति । परमस्मिन् सिद्धान्ते प्रधानतया तत्त्वत्रयं पञ्चभेदाश्च अङ्गीक्रियन्ते ।

**तत्त्वत्रयं पञ्चभेदाश्च**


**तत्त्वज्ञानान्निः श्रेयसाधिगमः (गौ.न्या.सू.–१/१/१)** एवं **"ऋते ज्ञानान्न मुक्तिः (हिर.के.शा.)"** इति श्रुतिस्मृतिवचोभिः तत्त्वज्ञानमन्तरा निःश्रेयसस्य दुष्करत्वं प्रपञ्चि । किन्नाम तत्त्वम् ? इति जिज्ञासा समाधीयते वैयाकरणैः नैयायिकैश्च ।

– तस्य (पदार्थस्य) भावः तत्त्वमिति व्युत्पत्तिः व्याकरणशास्त्रे ।

– **सत् सदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति, असच्च असदिति गृह्यमाणं यथाभूतमविपरीतं तत्त्वं भवति (न्या.भा. १–१–१)** इति हि महानैयायिकाः ।

अहो ! तत्त्वमीमांसा महाटवी । यतस्सकलसिद्धान्ते तत्त्वगणना तावत्पृथक् । परं सनातनवैदिकारण्ये **"चिद्, अचिद्, परमेश्वरः"** इति तत्त्वत्रयं प्रथितमस्ति ।

स्वामिनारायणसम्प्रदायेऽपि निगदितानि इमानि त्रीणि तत्त्वान्येव । परं सम्प्रदायेऽस्मिन् तत्त्वत्रयस्यैव पञ्चभेदाः प्रोक्ताः ।




**"जीवेश्वरब्रह्मपरब्रह्ममाया"** इति पञ्चभेदास्सन्ति । अत्र तावच्चित्तत्त्वस्य "जीवेश्वरब्रह्म" इति त्रयोऽनादिभेदप्रवाहास्सन्ति ।

ननु विशिष्टाद्वैतनये **"चिदचिद्विशिष्टं ब्रह्म"** इति एकमेव परमं तत्त्वम् । एवं सति त्रीणि तत्त्वानि पञ्च भेदा वा कथं स्युरिति चेत्तत्तु सत्यम् । परमं तत्त्वं तावदेकमेव । किञ्च 'परम' पदमेव अन्येषामपि अपरमतत्त्वानां सद्भावम् ज्ञापयति ।

**नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् । (कठ. उ. – २/२/१३)**

**सत्यस्य सत्यम् । (बृ.उ.–२/१/२०)**

इति श्रुतिवचसा परब्रह्मणः परमसत्यत्वम् इतरेषां सत्यत्वं निगद्यते ।

**द्वितीयो भेदः** – प्रायशः सर्वे पूर्वाचार्याः निराकारोपासनं प्रवर्तयामासुः । परं भगवन्तः श्रीस्वामिनारायणाः साकारोपासनं प्रवर्तयामासुः । तद्यथा –

**साकारोपासनम्**

"ननु भगवतो निर्गुणरूपं सूक्ष्मतोऽपि सूक्ष्मतमम् एवं सगुणरूपं स्थूलतोऽपि स्थूलतमं वर्तते, परमस्योभयरूपस्य धर्तुः परमात्मनो मूलस्वरूपं कीदृशमस्ति ? इति जिज्ञासायामुत्तीर्यते भगवता श्रीस्वामिनारायणेन यद् – सकलनयनगोचरं प्रकटरूपं मनुष्याकारं साकारस्वरूपं यद् द्विभुजं द्विचरणयुतं, तदेव परमात्मनो मूलस्वरूपम् । सगुणनिर्गुणभावस्तावद् भगवन्मूर्तेः अभिनवालौकिकैश्वर्यमस्ति **(का.वच.–८)** ।"

आत्मैवेदमग्र आसीत्पुरुषविधः । (बृ.उ.–१/४/१)

य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते । हिरण्यश्मश्रुः हिरण्यकेशः आप्रणखात्सर्व एव सुवर्णः तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी । (छा.उ.–१/६/६)

परात्परस्वरूपं तु द्विहस्तं सुमनोहरम् । (ना.प.–२/३२)

इति नैकानि श्रुतिवचांसि परमात्मनो **साकारस्वरूपत्वं (दिव्यमङ्गलविग्रहवत्त्वं)** साधयन्ति । सम्प्रदायेऽस्मिन् साकारस्वरूपोपासनमेव सुकरं प्रधानं सुप्रसिद्धञ्चास्ति ।

ननु "निष्कलं निष्क्रियं शान्तम् (श्वे.उ.–६/११)" इति बहूनि श्रुतिप्रमाणानि परमात्मनः निराकारस्वरूपत्वमपि बोधयन्ति । अतः "किं वा परमात्मनस्स्वरूपं साकारमुत निराकारम् ?" इति महती विप्रतिपत्तिः मुमुक्षूणां मनसि । परं तत्समाधातुं प्रवृत्ता भगवन्तः श्रीस्वामिनारायणा वचनामृते सदृष्टान्तं निवेदयामासुः यद् –

**"यथाम्बु निराकारं परं तद्देवता वरुणः स्वलोके साकारस्वरूपेण राराज्यमानो यथा भास्करप्रभा निराकारा परं भानुस्तावत् स्वादित्यमण्डले साकारः । तथैव सर्वव्यापकं तेजोरूपं सर्वान्तर्यामिस्वरूपं निराकारं, परं स्वधामस्थं (अक्षरधामस्थं) परमात्मस्वरूपं साकारं दिव्यचरणादियुतम् ।" (दुर्ग.प्र.वच.-४५)**

अन्तर्यामिस्वरूपं निराकारं सदपि साकारमिव कार्यं करोत्यतः तदपि साकारवज्ज्ञेयमिति इतरविलक्षणसाम्प्रदायिकोऽर्थः । कथं साकारमिव कार्यं करोति ? इति जिज्ञासाऽपि समाधीयते वचनामृते यद् - अन्तर्यामिणः कार्यं नियन्तृत्वं साक्षित्वञ्च । साक्षी तावद् द्रष्टैव । विना चक्षुर्भ्यां द्रष्टृत्वं कथं ? चक्षुष्मत्त्वं साधयति देहवत्त्वं । परमत्रानुसन्धेयं यद् - अस्मद्वन्मायिकदेहं नास्ति परमात्मनः, दिव्यमङ्गलविग्रहविशिष्टोऽयं नारायणः ।

इदमिदानीं वचनामृतभणितचतुर्भिर्हेतुभिः परमात्मनस्साकारस्वरूपत्वं साध्यते ।

**(१) कर्तृत्वात्**

अस्य चराचराखिलविश्वस्य कर्ता नारायण एव । इयं चराचरस्थावरजङ्गमात्मिका सृष्टिः साकृतिरेव । "साकारसृष्टेः कर्ताऽपि साकार एव" सिद्धान्तोऽयं निगदितो वचनामृते व्यतिरेकदृष्टान्तेन । यथा - "निराकाराम्बरात् साकारघटपटादीनां सृष्टिरसम्भवा (दुर्ग.म.वच.-१०)"। अनेन ज्ञायते यद् - साकारसृष्टेः उत्पित्तिस्थितिलयकर्ताऽपि साकृतिः नारायण एव ।

**(२) ईक्षणात्**

"स ईक्षत लोकान्नु सृजा इति (ऐ.उ.-१/१/१)" इति श्रुतिवचनात् सृष्ट्यादौ सृष्टिसङ्कल्पविशिष्टोऽयं नारायणः सन्ददर्श । यथा दिवा अभुञ्जानस्य पुरुषस्य पीनत्वदर्शनाद् रात्रिभोजनं कल्प्यते अर्थापत्तिप्रमाणतः । तथैव अत्रापि

ईक्षणक्रियया नेत्रश्रोत्राद्यवयववत्त्वं नारायणस्य कल्प्यते ।

**(३) तेजस्स्वरूपात्**

“कोटिसूर्यसमप्रभः” इति विशेषणेन परमात्मनः तेजो वर्णितमस्ति । सम्प्रदायेऽस्माकं अन्तर्यामितया व्यापकं यत् सच्चिदानन्दं ब्रह्म निराकारस्वरूपं तदेव तेजस्संज्ञाभिलपनीयम् । विना तेजोवता विग्रहेण तेजस एवासम्भवात् तेजः परममङ्गलदिव्यविग्रहवत्त्वं परमात्मनस्साधयति ।

**(४) व्यतिरेकसत्त्वात्**

परब्रह्मणोऽन्वयव्यतिरेकस्वरूपनिरूपणावसरे “नित्यमुक्तपरिचरितः स्वधामस्थो दिव्यमङ्गलविग्रहविशिष्टो नारायणः” इति परमात्मनो व्यतिरेकस्वरूपं चोदितम् । “विग्रहसत्त्वे व्यतिरेकस्वरूपसत्त्वम्” इति व्यतिरेकस्वरूपेण परमात्मनस्साकारस्वरूपवत्त्वं साधितमित्यलं विस्तरेण । विशेषतस्साम्प्रदायिकशास्त्रेभ्यः समधिज्ञेयम् ।